This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

दाखलक्र - M - 2644 विषय - वेद

नाव - ऐतरेय ब्राम्हण सप्तम पंचिका

लेखक / लिपीकार -

पृष्ठ - 13 काळ -

पुर्ण / अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीरामकृष्ण वेदव्यासो वेदपुरुषो वासुदेवाय ते॥

॥नमः॥ ॥इति सप्तमपंचिकाप्रारंभः॥ ७ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ९ ॥ ॥ श्रीरामायनमः ॥ ओं ॥ अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्या
मो हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष उद्गातुः कंठः काकुद्रः प्रतिहर्तुर्द
क्षिणा श्रोणिर्होतुः सव्या ब्रह्मणो दक्षिणं सक्थि मैत्रावरुणस्य स
व्यं ब्राह्मणाछंसिनो दक्षिणं पार्श्वं सांसमध्वर्योः सव्यमुपगातॄ
णां सव्योंसः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्दक्षिण ऊरु
रछावाकस्य सव्यमाग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य सव्यः स
दस्यस्य सदं चानूकं च गृहपतेर्दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य
सव्यौ पादौ गृहपतेर्भार्यायै व्रतप्रदस्यौष्ठमेनयोः साधारणो भव
ति तं गृहपतिरेव प्राश्नीयाज्जाघनीं पत्नीभ्यो हरंति तां ब्राह्मणा ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदद्युस्त्वं ध्याश्चमणिकास्तिस्तश्च्यैकीकसाग्रावस्तुतः स्तिस्त
श्चैवकीकसास्प्रध्यंचैवैकर्तस्यान्नेतुरध्यंचैववैकर्तस्यक्लोमाच
त्वामितुःस्त ब्राह्मणायदद्याद्यद्ब्राह्मणस्याच्छिरःसुब्रह्मण्याये
यश्वःसुत्यांप्राहतस्याजिनमिव्कासर्वेषांहोतुर्वातावाहत्ताःषड्विं
शतिमेकपदायज्ञेवहंतिषड्विंशाद्दसरावैवहतीबाहतास्वर्गा
लोकाःप्राणांश्चैवतत्स्वर्गेश्च्यलोकानामुवंतिप्राणेषुचैवतत्स्व
र्गेषुचलोकेषुप्रतितिष्ठंतोयंतिसरापःस्वर्ग्यःपशुर्यल्लनमे
वंविभजेत्स्यथयेतान्यथातद्यथासेलगावापापकृतोवापशुंविम
थ्नीरंस्तादृत्तत्तांबाहतांपरोविमन्तिंश्रोतऋषिर्देवभागोविदां

॥२॥

चकार तामुहा प्रोच्येवास्माल्लोकादुच्चक्राम तां मुहगार्ह-जायबा
भ्रव्यायामनुष्यः प्रोवाच ततो हैनामेतदर्वाग्भ्रमैष्या अधीयतेधी नु
यते ॥ १ ॥ इति सप्तपंचिकायां प्रथमोध्यायः ॥ राम ॥ तदाहुर्य
आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञस्यादिति नैनं याज
येदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति तदाहुर्य आहिताग्निरधि
श्रिते ग्निहोत्रे सांनाय्ये वा हविःषु वा म्रियेत का तत्र प्रायश्चित्ति
रित्यत्रैवैनान्यनुपर्यादध्याद्यथा सर्वाणि संदह्येरन्त्सा तत्र प्राय
श्चित्तिस्तदाहुर्य आहिताग्निरासंनेषु हविःषु म्रियेत का तत्र प्रा
यश्चित्तिरिति याभ्य एव तानि देवताभ्यो हवींषि गृहीतानि भवं

॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिताभ्यः स्वाहेत्येवैनान्याहवनीये सर्व्वहुतिं जुहुयात्सा तत्र प्रायश्चि
त्तिस्तदाहुर्य आहिताग्निः प्रवसन्म्रियेत कथमस्याग्निहोत्रं स्या
दित्यभिवान्यवत्सायाः पयसा जुहुयादन्यदिवेतस्योयद
भिवान्यवत्साया अन्यदिवैतदग्निहोत्रं यत्प्रेतस्यापि वा य
त एवंकृतश्च पयसा जुहुयुः रथाप्याहुरेवमेवैनानजस्रान
जुहुत इंधीरन्नाशरीराणामाहुतयोरिति यदि शरीराणि न वि
द्येरन्पर्णशरः षष्टिः त्रीणि च शतान्याहृत्य तेषां परु परू पक
मिवकृत्वा तस्मिंस्तामावृतं कुर्युरथैनां छरीरे रोहृतेः संस्प
श्यो द्वासयेयुरध्यर्द्धशतं कायै सक्थिपनी द्वे पंचाशरस्यचविं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ३ ॥

श्चोत्रोरुद्धिपंचविंशेशेषंतुशिरस्युपरिदध्यात्सातत्रप्रायश्चि
त्तिः ॥ २ ॥ तदाहुर्यस्याग्निहोत्र्युपावसृष्टादुह्यमानोपवि
शेत्क्वातत्रप्रायश्चित्तिरिति तामभिमंत्रयेत यस्माद्भीषानि
षीदसि ततो नो अभयं कृधि ॥ पशून्नः सर्वान्गोपाय नमो
रुद्राय मीढुषइति तामुत्थापयेदुदस्थाद्देव्यदितिरायुर्य
ज्ञपतावधात् ॥ इंद्राय कृण्वती भागं मित्राय वरुणाय
चेत्यथास्या उदपात्रं मुखेसिंच मुखे चोपगृह्णीयाद्दधेनांब्रा
ह्मणाय दद्यात्सातत्रप्रायश्चित्तिस्तदाहुर्यस्याग्निहोत्र्यु
पावसृष्टादुह्यमाना वाश्येत कातत्रप्रायश्चित्तिरित्यशनायां

॥ ३ ॥

यांहवा एषां[प]जमानस्यप्रतिख्यापवाश्च्यतेतामन्नमप्यादयेद्धां
स्यैशांतिर्वोऽअन्नंस्यसाद्भगवतीहिभूयाइतिसातत्रप्रायश्चित्ति
स्तदाहुर्यस्याग्निहोत्र्युपावसृष्टादुह्यमानास्पंदेतकातत्रप्रायश्चि
त्तिरितिसापत्रत्रस्कंदेयेत्तदभिमृश्यजपेद्यदद्यदुग्धंपृथिवीमसृप्र ५८
पदोषधीरत्यसरद्यदापः॥पयोगृहेषुपयोघ्न्यायांपयोवत्सेषुपयो
ब्रह्मसुतन्मईतितत्रयत्परिशिष्टंस्यात्तेनजुहुयाद्यद्यत्यंहोमायस्या
द्यद्युवैसर्वंसिक्तंस्यादथान्यामाहूयतांदुग्ध्वातेनजुहुयादात्वे
वश्रेद्धापेहोतव्यंसातत्रप्रायश्चित्तिः॥३॥तदाहुर्यस्यसा
यंदुग्धंसान्नाय्यंदुष्येद्वापहरेद्वाकातत्रप्रायश्चित्तिरितिप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ तदुग्धं दुष्टं कृत्वा तस्यान्यतरां भक्तिमातच्य तेन यजेत तस्मात
त्र प्रायश्चित्तिः स्त द्वाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापह
रेद्वा का तत्र प्रायश्चित्तिरित्यैंद्रं वा माहेंद्रं वा पुरोळाशं तस्य
स्थाने निरूप्य तेन यजेत तस्मात् तत्र प्रायश्चित्तिः स्त द्वाहुर्यस्य सर्वमे
व सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैंद्रं वा माहेंद्रं वे
ति समानं स्मात् तत्र प्रायश्चित्तिः स्त द्वाहुर्यस्य सर्वाण्येव हवींषि
दुष्येयुर्वापहरेयुर्वा का तत्र प्रायश्चित्तिरित्याज्यस्यैनानि यथा
देवतं परिकल्प्य तयाज्यहविषेष्ट्या यजेतातोन्यामिष्टिमनु
त्बणां तन्वीत यतो यज्ञस्य प्रायश्चित्तिः ॥४॥ तद्वाहुर्यस्याग्नि ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होत्रमधिश्रितममेध्यमापद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रुच्याभि
पर्यासिच्य प्राङुदेत्याहवनीये हैतां समिधमभ्यादधात्यथोत्तरत आहवनी
यस्योष्णं भस्म निरूह्य जुहुयान्मनसा वा प्राजापत्ययार्चा तद्धुतं चाहुतं
च स यद्येकस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पस्तच्चेद्व्यपनरेत्तं शकु
यान्निःषिच्येत तद्दृष्टमदृष्टमभिपर्यासिच्य तस्य पयोन्नीतीस्यात्तथा
जुहुयात्सा तत्र प्रायश्चित्तिः स यदाह यस्याग्निहोत्रमधिश्रितं स्कं
दति वा विष्यंदते वा का तत्र प्रायश्चित्तिरिति तदद्भिरुपनिनयेच्छं
येशांतिर्वा आपोथैनद्दक्षिणेन पाणिनाभिमृश्य जपति दिवं तृती
यं देवान्यज्ञो गात्ततो मा द्रविणमाष्टांतरिक्षं तृतीयं पितॄन्यज्ञो गा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ न्नतो माद्रावणमाष्ट पृथिवीं तृतीयं मनुष्यान्यत्तेगान्नतो माद्रविणमाष्ट
पयो रोजसा स्कुभितार जां सीति निक्षु वारुणी मन्त्रं जपति विष्णु
र्वैयज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं तयोरुभयोरेव शांत्यै सा तत्र
प्रायश्चित्तिः स्त्त दाहुर्यस्याग्निहोत्रमधिश्रितं प्राङ् उदायन् स्कन्
न्नतेवापि वाम्नं शांते कातत्र प्रायश्चित्तिरिति स यद्धैपानिवर्त्ते
ये स्वर्गाल्लोकाद्युजमानमावर्त्तयेदत्रैवास्मादुपविष्टायेत
मग्निहोत्रपरिशेषमाहरेयुस्तस्य यथोन्नीतीस्यात्तथा
जुहुयात्सा तत्र प्रायश्चित्तिः स्त्त दाहुरथ यदि स्रुग्भिद्येत का
तत्र प्रायश्चित्तिरित्यन्यां स्रुचमाहृत्य जुहुयाद्यदथैतां स्रु ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंभिंनामाहवनीयेभ्यादध्यात्साग्दंडांप्रत्यक्स्पुष्करांसात
त्रप्रायश्चित्तिः स्तदाहुर्यस्याहवनीयेहाग्निर्विद्येताथ
गार्हपत्यउपशाम्येत्कातत्रप्रायश्चित्तिरितिसयदिप्रां
चमुद्धरेत्स्वायतनाच्च्यवेतयत्प्रत्यंचमसुरवृद्धयज्ञंतन्वीतय
म्थेद्धान्तयंयजमानस्यजनेयेद्यदनुगमयेत्प्राणोयज
मानंजह्यात्सर्वमेवैनंसहभस्मानंसमोप्यगार्हपत्या
यतनेनिधायाथप्रांचमाहवनीयमुद्धरेत्सातत्रप्राय
श्चित्तिः॥५॥तदाहुर्यस्याग्नावग्निमुद्धरेयुःकातत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥दि॥

प्रायश्चित्तिरिति स यद्यनुपश्येदुदूह्य पूर्वमपरं निदध्याद्यद्य
नानुपश्येत्सोऽग्नयेऽग्निवतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेत्या
हुतिं वाहवनीये जुहुयादग्नयेऽग्निवते स्वाहेति सा तत्र प्रा
यश्चित्तिः स यदाहर्ये स्य गार्हपत्याहवनीयौ मिथः संसृ
ज्येयातां का तत्र प्रायश्चित्तिरिति सोऽग्नये वीतयेऽष्टाक
पालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अग्न आया
हि वीतये यो अग्निं देववीतय पर स्वाहुतिं वाहवनीये जुहु
यादग्नये वीतये स्वाहेति सा तत्र प्रायश्चित्तिः स यदाहुर्ये

॥दि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य सर्व एवाग्नयो मिथः संसृज्येरन्का तत्र प्रायश्चित्ति
रिति सोऽग्नये विविचयेष्टाकपालं पुरोळाशं निर्वपेत्तस्य
याज्यानुवाक्ये स्वर्णवस्तोरुषसामरोचि त्वामग्ने मा
नुषीरीळते विशो इत्याहुतिं वाहवनीये जुहुयादग्न
ये विविचये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्य
स्याग्नयोऽन्यैरग्निभिः संसृज्येरन्का तत्र प्रायश्चि
त्तिरिति सोऽग्नये क्षामवतेष्टाकपालं पुरोळाशं नि
र्वपेत्तस्य याज्यानुवाक्ये अक्रंददग्निः स्तनयंनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ७ ॥

व द्यौरधायधानः पितरः परासइत्याहुतिं वाहवनीयेजुहु
यादग्नये क्षामवते स्वाहेति सात्रेतं प्रायश्चित्तिः ॥ ६ ॥
तदाहुर्यस्याग्नयो ग्राम्येणाग्निना संदह्येरन्कातत्र
प्रायश्चित्तिरिति सोग्नये संवर्गाय पाष्टाकपालं पुरो
डाशंनिर्वपेत्तस्य याज्यानुवाक्ये कुविस्सु नो गवि
ष्टये मा नो प्रस्मिन्महाधनइत्याहुतिं वाहवनीये
जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्ति
स्तदाहुर्यस्याग्नयो दिव्येनाग्निना संसृज्येरन्कात

॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र प्रायश्चित्तिरिति सोऽग्नये सुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये अस्वाने सप्तिष्टव मयोद धेमे धिरः पूतदक्ष इत्या
शु हुतिं वाहवनीये हुयादग्नये सुमते स्वाहेति सा तत्र प्रायश्चित्ति
स्तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति
सोऽग्नये शुचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अ
ग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्याहुतिं वाहवनीये जुहुया
दग्नये शुचये स्वाहेति सा तत्र प्रायश्चित्ति स्तदाहुर्यस्याग्नय
आरण्येनाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति समेवारोप
येदरणीवोल्मुके वा मोक्षयेद्यद्याहवनीयाद्यदि गार्हपत्याद्यदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ८ ॥

नश्यानुयात्सोग्नये संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्योक्ते
याज्यानुवाक्ये आहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति
सा तत्र प्रायश्चित्तिः ॥ ९ ॥ तदाहुर्यस्याहिताग्निरुपवसथेऽश्रु कुर्वी
त का तत्र प्रायश्चित्तिरिति सोग्नये व्रतभृतेऽष्टाकपालं पुरोडाशं
निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतभृच्छुचिर्व्रतानि बिभ्र
द्व्रतपा अदब्ध्यर स्ताहुतिं वाहवनीये जुहुयादग्नये व्रतभृते स्वा
हेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याहिताग्निरुपवसथे व्रत्य
मापद्येत का तत्र प्रायश्चित्तिरिति सोग्नये व्रतपतयेऽष्टाकपालं पु
रोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वमग्ने व्रतपा असि ॥ य

॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वौवयंप्रमिनामब्रतानीत्याहुतिं वाहवनीयेजुहुयादग्नयेव्रतप
तयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यआहिताग्निरमावास्यांपौ
र्णमासींवातीयात्कातत्रप्रायश्चित्तिरितिसोग्नयेपथिकृते
ष्टाकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येवेत्थाहिवेधोग्ने
ध्वनआदेवानामपिपंथामगन्मेत्याहुतिंवाहवनीयेजुहुया
दग्नयेपथिकृतेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यस्य
सर्वएवाग्नयउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसो
ग्नयेतपस्वतेजनद्वतेपावकवतेष्टाकपालंपुरोडाशंनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ र्वपेत्तस्य याज्यानुवाक्ये आ याहि तपसा जनेष्वाग्नो याहि तप
सा जनेष्वित्याहुतिं वाहवनीये जुहुयादग्नये तपस्वते जनद्व
ते पावकवते स्वाहेति सा तत्र प्रायश्चित्तिः ॥८॥ तदाहुर्यस्या
हिताग्निरागतपणीनानिष्ठानवान्नं प्राश्नीयात्का तत्र प्रा
यश्चित्तिरिति सोऽग्नये वैश्वानराय द्वादशकपालं पुरोळा
शं निर्वपेत्तस्य याज्यानुवाक्ये वैश्वानरो अजीजनत्पृष्टो दि
वि पृष्टो अग्निः पृथिव्यामित्याहुतिं वाहवनीये जुहुया
दग्नये वैश्वानराय स्वाहेति सा तत्र प्रायश्चित्तिः तदाहु ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः=आहिताग्निर्यदि कपालं नश्येत्काल तत्र प्रायश्चित्तिरिति सोऽग्नि
भ्यां द्विकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये अश्विनाव
र्त्तिरस्मदा गोमता नासत्या रथेन त्वाहुतिं वा हवनीये जुहुया
दश्विभ्यां स्वाहेति सा तत्र प्रायश्चित्ति स्तदाहुर्यः आहिताग्नि
र्यदि पवित्रं नश्येत्काल तत्र प्रायश्चित्तिरिति सोऽग्नये पवित्रवते
ष्टाकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्यै वित्रं ते वि प६
ततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पद इत्याहुतिं वा ह
वनीये जुहुयादग्नये पवित्रवते स्वाहेति सा तत्र प्रायश्चित्ति
स्तदाहुर्यः=आहिताग्निर्यदि हिरण्यं नश्येत्काल तत्र प्रायश्चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ त्तिरिति सोग्नये हिरण्यवतेष्टाकपालं पुरोडाशं निर्वपेत्तस्य या
ज्यानुवाक्ये हिरण्यकेशो रजसो विसारे आ ते सुपर्णा अमिनंतं
एवैरित्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वाहे
ति सा तत्र प्रायश्चित्तिः स चेदाहुर्य आहिताग्निर्यदि प्रातर
स्नातोग्निहोत्रं जुहुयात्का तत्र प्रायश्चित्तिरिति सोग्नये वरु
णायाष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये त्वं नो
अग्ने वरुणस्य विद्वान्स त्वं नो अग्ने वमो भवोतीत्याहुतिं
वाहवनीये जुहुयादग्नये वरुणाय स्वाहेति सा तत्र प्रायश्चि
त्तिः स चेदाहुर्य आहिताग्निर्यदि सूतकान्नं प्राश्नीयात्का ॥१०॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रप्रायश्चित्तिरिति सोग्नये तंतुमते ष्टाकपालं पुरोळाशं निर्वपेत्तस्य
याज्यानुवाक्ये तंतुं तन्वन्रजसो भानुमन्विह्यक्षानहो नह्यतनो
त सोम्या इत्याहुतिं वाहवनीये जुहुयादग्नये तंतुमते स्वाहेति सात
त्र प्रायश्चित्तिस्तदाहुर्यस्याहिताग्निर्ज्वरेवमते रात्रं श्रे सो काल तत्र
प्रायश्चित्तिरिति सोग्नये सुरभिमते ष्टाकपालं पुरोळाशं निर्वपे
त्तस्य याज्यानुवाक्ये अग्निर्होतान्यसीद यजीयान्त्साध्वीमकर्दे
ववीतिं नो अद्येत्याहुतिं वाहवनीये जुहुयादग्नये सुरभिमते
स्वाहेति सा तत्र प्रायश्चित्तिः स्तदाहुर्यस्याहिताग्नेर्यस्य भार्या
गौर्वा यमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोग्नये मरुत्वते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयोदशाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि
॥११॥ क्षये राइ वेद्धर मात्रहेवेत्याहुतिं वाहवनीये जुहुयादग्नये मरुत्व
ते स्वाहेति सा तत्र प्रायश्चित्ति स्तदाहुरपत्नीकोप्यग्निहोत्रमाहरे ३
तू॥ नाहरे ३ तू इति ॥ आहरेदित्याहुर्यदि नाहरेदनद्धा पुरुषः
कोनद्धा पुरुष इति न देवान्न पितॄन्न मनुष्यानिति तस्मादपत्नीको
प्यग्निहोत्रमाहरेत्तदेषाभियज्ञगाथा गीयते ॥ यजेत सौत्रामण्यो म
पत्नीकोप्यसोमपः ॥ मातापितृभ्यां मन्त्रणार्थं यजेतिवचनात्प्र
तिरितितस्मात्सोम्यं याजयेत् ॥७॥ तदाहुर्वाचा पत्नीकोग्निहोत्रं
कथमेव जुहोतीति निविष्टे मृता पत्नी नष्टा वाग्निहोत्रं कथमग्निहो
॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रं जुहोति पुत्रान्पौत्रान्नप्तॄनित्याहुरस्मिंश्च लोके मुष्मिंश्चास्मिंल्लो
केऽयं स्वर्गोऽस्वर्गेण स्वर्गं लोकमारूरोहेत्यमुष्येव लोकस्य संततिं
धारयति यस्यैषां पत्नी नेत्येतस्मादपत्नीकस्याधानं कुर्वीत्यपत्नीकोऽ
ग्निहोत्रं कथमग्निहोत्रं जुहोति श्रद्धा पत्नी सत्यं यजमानः श्रद्धा स
त्यं तदित्युत्तमं मिथुनं श्रद्धया सत्येन मिथुनेन स्वर्गांल्लोकांजयती
ति ॥१०॥ तदाहुर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य
देवा हविरश्नंति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति
पूर्वां पौर्णमासीमुपवसेदिति पैंग्यमुत्तरामिति कौषितकं या पूर्वा
पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सि
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्य

॥१२॥ नीवालीयोत्तरासाकुहूः यांपर्यस्तमियादभ्युदियादितिसाति

थिः पूर्वांपौर्णमासीमुपवसेद् निर्ज्ञायपुरस्तादमावास्यायां

तेन चंद्रमसं यदुपेतियद्यजते सोमं क्रीणंतीति नेत्तरामुत्तरामुप

वसेदुत्तराणिह वै सोमाय यजंते सोममनुदेवतमेतद्वै सोमं यच्चं देव८

द्रमास्तस्मादुत्तरामुपवसेदिति ॥११॥ तदाहुर्यस्याग्निमनुद्धृ

तमादित्योभ्युदियाद्वाभ्यस्तमियाद्वा प्रणीतोवा प्राग्घोमा

दुपशाम्येत्कातत्रप्रायश्चित्तिरिति हिरण्यं पुरस्कृत्य सायमु

द्धरेज्ज्योतिर्वै शुक्रं हिरण्यं ज्योतिः शुक्रमसौ तदेनं तज्ज्योतिः

शुक्रं पश्यंनुद्धरति रजतमंतर्धाय प्रातरुद्धरेद्दे तद्रात्रिरू ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंपुरासंभेदाद्यायानामाहवनीयमुद्धरेन्मत्स्यैर्वैतमच्छायां
तेनैवतज्ज्योतिषामत्यंतमच्छायांतरति सा तत्र प्रायश्चित्ति
स्तदाहुर्यस्य गार्हपत्याहवनीयावंतरेणानोवारथोवाश्वा
वाप्रतिपद्येत कातत्रप्रायश्चित्तिरिति नेनमनसि कुर्यादित्याहु
रास्मन्नस्य हिता भवंतीति तच्चेन्मनसि कुर्वीत गार्हपत्यादावनीयच्छ
नामुदकधारांहरेत्तंतुंतन्वन्नजसोभानुमन्विहस्त्याहवनीया हर्द्दे
त्सातत्रप्रायश्चित्तिस्तदाहुः कथमग्नीनन्वादध्यानोन्वाहा
र्यपचनमाहारयेदुत ॥ नाहारयेदुत इति ॥ आहारयेदित्या
हुः प्राणान्वा एषोभ्यासंधत्ते योग्नीनाधत्ते तेषामेषोन्वादन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोऽन्नवति यदन्वाहार्यपचनस्तस्मिंनेतामाहुतिंजुहोत्यग्न
येन्नादायान्नपतये स्वाहेत्यंनादो हान्नपतिर्भवत्यश्नुते प्र
जयांनाद्यं य एवं वेदांतरेण गार्हपत्याहवनीयौ हास्य न संच
रेतेतेन ह वा एनं संचरमाणमग्नयो विदुरयमस्मासु हो
ष्यतीत्येतेन ह वा अस्य संचरमाणस्य गार्हपत्याहवनीयौ
पाप्मानमपहतः सोपहतपाप्मोर्ध्वः स्वर्गं लोकमेतीति
वै ब्राह्मणमुदाहरंति तदाहुः कथमग्नीन्प्रवत्स्यन्नुपति
ष्ठेत प्रोष्य वा प्रत्याहरहर्वै तिन्तूष्णीमित्याहुस्तूष्णीं वै
श्रेयसे आकांक्षंते तथा प्याहुरहरह वारिते यजमानस्याश्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वयोर्द्वासनात्सन्नावनाद्विश्यपतितानुपतिष्ठेते वाभयं वोभयं मे
स्विस्त्यपत्यं हैवास्मै भवत्यभयं हैवास्मै भवति ॥११॥३२॥२॥
॥इति सप्तमपंचिकायां द्वितीयोध्यायः ॥ ॥हरिश्चंद्रो ह वैध
स ऐक्ष्वाको राजापुत्र आस तस्य ह शतं जाया बभूवुस्तासु पुत्रं
न लेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रच्छ यन्न्वि
मं पुत्रमिच्छंति ये विजानंति ये च न ॥ किंस्वित्पुत्रेण विंदते तन्म
आचक्ष्व नारदेति स एकया पृष्टो दशभिः प्रत्युवाच ॥ ऋण
मस्मिन्संनयत्यमृतत्वं च गच्छति ॥ पिता पुत्रस्य जातस्य पश्ये
च्चेज्जीवतो मुखं ॥ यावंतः पृथिव्यां भोगा यावंतो जातवेदसि ॥
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावंतोअप्सु प्राणिनांभूयान्पुत्रे पितु स्ततः ॥ शश्वत्पुत्रेण
पितरोत्यायन्बहुलंतमः ॥ आत्माहिजज्ञआत्मनः सइराव
त्यतितारिणी ॥ किंनुमलंकिमजिनंकिमुश्मश्रूणि किंत
पः ॥ पुत्रंब्रह्माणइछध्वंसवैलोकोवदावदः ॥ अन्नंहप्राणः
शरणंहवासोरूपंहिरण्यंपशवोविवाहाः ॥ सखाहजा
या कृपणंहदुहिताज्योतिर्हपुत्रः परमेव्योमन् ॥ पतिर्जा
यांप्रविशतिगर्भोभूत्वासमातरं ॥ तस्यांपुनर्नवोभूत्वा
दशमेमासिजायते ॥ तज्जायाजायाभवतियदस्यांजा
यतेपुनः ॥ आभूतिरेषाभूतिर्बीजमेतंनिधीयते ॥ देवाश्चैता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृषयश्चैतेजःसमभरन्महत्॥ देवामनुष्यानब्रुवन्नेषावो
जननीपुनः॥ नापुत्रस्यलोकोस्तीतितत्सर्वेपशवोविदुः॥
तस्मात्तुपुत्रोमातरंस्वसारंचाधिरोहति॥ एषपंथाउरुगा
यःसुशेवोयंपुत्रिणआक्रमंतेविशोकाः॥ तंपश्यंतिपशवो
वयांसिचतस्मात्तेमात्रापिमिथुनीभवंतीतिहस्माआख्या
य॥३१॥ अथैनमुवाचवरुणंराजानमुपधावपुत्रोमेजाय
तांतेनत्वायजाइतितथेतिसवरुणंराजानमुपससारपुत्रो
मेजायतांतेनत्वायजाइतितथेतितस्यहपुत्रोजज्ञेरोहि
तोनामतंहोवाचाजनिवैतेपुत्रोयजस्वमानेनेतिसहोवाचे

॥३५॥ यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशोन्व स्त्वथ
त्वा यजा इति तथेति स ह निर्दश आस तं होवाच निर्दशो न्व भू
द्यजस्व मानेनेति स होवाच यदा वै पशोर्दंता जायंतेथ स
मेध्यो भवति दंता न्वस्य जायंतामथ त्वा यजा इति तथेति
तस्य ह दंता जज्ञिरे तं होवाचाज्ञत वा अस्य दंता यजस्व
मानेनेति स होवाच यदा वै पशोर्दंताः पद्यंतेथ स मेध्यो
भवति दंता न्वस्य पद्यंतामथ त्वा यजा इति तथेति तस्य
ह दंताः पेदिरे तं होवाचापत्सत वा अस्य दंता यजस्व
मानेनेति स होवाच यदा वै पशोर्दंताः पुनर्जायंते ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थसमेध्यो भवति दंतान्वस्य पुनर्जायंतामथत्वायजा इतित
थेति तस्य ह दंताः पुनर्जज्ञिरे तं होवाचाज्ञत वा अस्य पुनर्दं
ता यजस्व नु मानेनेति स होवाच यदा वै क्षत्रियः सान्नाहुको भ
वत्यथ स मेध्यो भवति संनाहं नु प्राप्नोत्वथ त्वा यजा इतित
थेति स ह संनाहं प्राप तं होवाच सन्नाहं नु प्रापद्यजस्व मा
नेनेति स तथेत्युक्त्वा पुत्रमामंत्रयामास तताऽयं वै मह्यं त्वा
मददाद्धन्त त्वयाहमिमं यजा इति स ह नेत्युक्त्वा धनुरादा
यारण्यमुपातस्थौ स संवत्सरमरण्ये चचार ॥१४॥ अथ
हैक्ष्वाकं वरुणो जग्राह तस्य होदरं जज्ञे तदु ह रोहितः शुश्राव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १६ ॥ सोरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥ नानाश्रां
ताय श्रीरस्तीति रोहित शुश्रुम ॥ पापो नृषद्वरो जन इंद्र इच्चर
तः सखा चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥ द्विती
यं संवत्सरमरण्ये चचार सोरण्याद्ग्राममेयाय तमिंद्रः पुरुष
रूपेण पर्येत्योवाच ॥ पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फलग्रहिः ॥
शेरेस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः चरैवेति चरैवेति
वै मा ब्राह्मणो वोचदिति ह ॥ तृतीयं संवत्सरमरण्ये चचा
र सोरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥
आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ॥ शेते निप ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घमानस्यचरातिचरतोभगः श्चरैवेतिचरैवेतिवैमाब्राह्मणो
वोचदितिह॥ चतुर्थंसंवत्सरमरण्येचचारसोरण्याद्ग्राममेया
यंतमिंद्रः पुरुषरूपेणपर्येत्योवाच॥ कलिः शयानोभवति
संजिहानस्तुद्वापरः॥ उत्तिष्ठंस्त्रेताभवति कृतंसंपद्यतेच
रंश्चरैवेतिचरैवेतिवैमाब्राह्मणोवोचदितिह॥ पंचमंसं
वत्सरमरण्येचचारसोरण्याद्ग्राममेयायंतमिंद्रः पुरुषरूपेण
पर्येत्योवाच॥ चरन्वैमधुविंदतिचरन्स्वादुमुदुंबरं॥ सूर्य
स्यपश्यश्रेमाणंयोनतंद्रयतेचरंश्चरैवेतिचरैवेतिवैमाब्राह्मणो
वोचदितिह॥ षष्ठंसंवत्सरमरण्येचचारसोजीगर्तंसौयवसिमृषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१७॥ मशनायापरीतमरण्यउपेयायतस्यहत्रयः पुत्राआसुः शुनःपु
च्छः शुनःशेपः शुनोलांगूल इति तंहोवाच ऋषेहंते शतंददाम्यह
मेषामेकेनात्मानं निष्क्रीणा इति सज्येष्ठं पुत्रंनिगृह्णानउवाच
नन्विममिति नोएवेममिति कनिष्ठंमातातौहमध्यमे संपादयां
चक्रतुः शुनःशेपेतस्यह शतंदत्वा स तमादाय सोरण्याद्ग्राममे
याय स पितरमेत्योवाच ततहंतोहमनेनात्मानंनिष्क्रीणा इति
सवरुणंराजानमुपससारानेनत्वायजा इति तथेति भूयान्वै
ब्राह्मणः क्षत्रियादिति वरुणउवाच तस्माऽएतंराजसूयं यज्ञ
क्रतुंप्रोवाच तमेतमभिषेचनीये पुरुषं पशुमालेभे ॥१६॥ तस्य ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्मायास्य उ
द्गाता तस्मा उपाकृताय नियोक्तारं न विविदुः स होवाचाजीगर्तिः
सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति तस्मा अपरं
शतं ददुस्तं स निनियोज तस्मा उपाकृताय नियुक्तायाप्रीताय
पर्यग्निकृताय विशासितारं न विविदुः स होवाचाजीगर्तिः सौ
यवसिर्मह्यमपरं शतं दत्ताहमेनं विशासिष्यामीति तस्मा अ
परं शतं ददुः सोऽसिं निःशान एयायाथ ह शुनःशेप ईक्षांचक्रे
मानुषमिवैव मा विशासिष्यंतिहंताहं देवतामुपधावामीति स
प्रजापतिमेव प्रथमं देवतानामुपससार कस्य नूनं कतमस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानामित्येतपृच्छौ तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठ
स्तमेवोपधावेति सोग्निमुपससाराग्नेर्वपिं प्रथमस्यामृताना
मित्येतपृच्छौ तमग्निरुवाच सविता वै प्रसवानामीशे तमेवो
पधावेति स सवितारमुपससाराभित्वादेव सवितरित्येते
न तृचेन तं सवितोवाच वरुणाय वै राज्ञेभियुक्तोसि तमेवोप
धावेति स वरुणं राजानमुपससार त उत्तराभिरेकत्रिंशता
तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुत्य
थ त्वोत्स्रक्ष्याम इति सोग्निं तुष्टाव त उत्तराभिर्द्वाविंशत्यात
मग्निरुवाच विश्वान्नु देवान्स्तुह्यथ त्वोत्स्रक्ष्याम इति स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वांदेवांस्तुष्टाव नमो महद्भ्यो नमोऽर्भकेभ्य इत्येतय
र्चा तं विश्वे देवा ऊचुरिंद्रो वै देवानामोजिष्ठो बलिष्ठः स
हिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम
इति स इंद्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति चैतेन सूक्ते
नोत्तरस्य च पंचदशभिस्तस्मा इंद्रः स्तूयमानः प्रीतो
मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय शश्वदिं
द्र इति तमिंद्र उवाचाश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति
सोऽश्विनौ तुष्टावात उत्तरेण तृचेन तमश्विनावूचतुरुष
सं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति स उषसं तुष्टावात उत्तरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३९॥ णात्तचेनं तस्य हस्तमर्थ्यर्चिर्मुक्ताः यां विपाशो मुमुचे गद ऐक्ष्वा
कस्यास ॥ ६ ॥ तमृत्विजेऽब्रुवं स्त्वमेव नोऽस्याह्नः संस्थामधि
शे गच्छेत्यथ हैतं शुनःशेपोऽजवं ददर्श तमेताभिश्चतसृभिरभि :स३
सुषाव यच्चिद्धि त्वं गृहे गृह इत्यथैनं द्रोणकलशमभ्यव
निनायोच्छिष्टं चम्वोर्भरेत्यथ तत्सर्वं प्रहास्मिन्नन्वारब्धे पूर्वा
भिश्चतसृभिः सस्वाहाकाराभिर्जुहवांचकाराथैनमवभृ
थमभ्यवनिनाय त्वं नो अग्ने वरुणस्य विद्वानित्येताभ्या
मथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्थापयांचकार शु
नश्चिच्छेपं निदितं सहस्रादित्यथ ह शुनःशेपो विश्वामित्रः
+ यां विपाशो मुमुचे कन्यायै ऐक्ष्वाकस्योदरं भवतस्तमस्यामवर्च्युक्ता ॥

॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यां कृमास सादं स होवाचाजीगर्त्तः सौयवसिर्ऋषे पुनर्मे पुत्रं दे
हीति नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति स ह
देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्रवाः स होवा
चाजीगर्त्तः सौयवसिस्त्वं वेहि विह्वयावहा इति स होवाचाजी
गर्त्तः सौयवसिरांगिरसो जन्मनास्याजीगर्त्तिः श्रुतः कविः ॥
ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि मामिति स होवाच शुनः
शेपोऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत गवां त्रीणि शतानि
त्वमवृणीथा मदंगिर इति स होवाचाजीगर्त्तः सौयवसिस्तद्वै
मा तात तपति पापं कर्म मयाकृतं ॥ तदहं निह्नुवे तुभ्यं प्रतियंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

त्रातागावामिति स होवाच शुनःशेपो यः सकृत्पापकं कुर्यात्कुर्याद
नत्ततोपरं ॥ नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतमित्यसं
धेयमिति ह विश्वामित्र उपपपाद स होवाच विश्वामित्रो भी
म एव सौयवसिः शासेन विशिशासिषुः ॥ अस्थान्मैतस्य पुत्रो
भूर्ममैवोपेहि पुत्रतामिति स होवाच शुनःशेपः स वै यथा नो
ज्ञपया राजपुत्र तथा वद ॥ यथैवांगिरसः सन्नुपेयां तव पुत्रता
मिति स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रे
ष्ठा प्रजा स्यात् ॥ उपेया दैवं मे दायं तेन वै त्वोपमंत्रय इति स
होवाच शुनःशेपः संजानानेषु वै ब्रूयात्सौहार्दाय मे श्रियै ॥

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाहं भरत ऋषभोपेयीत व पुत्रता मि सथ ह विश्वामित्रः पुत्राना
मंत्रयामास मधुछंदाः शृणोतन ऽऋषभो रेणुरष्टकः ॥ ये के च भ्रा
तरस्स्थनास्मै ज्यैष्ठ्याय कल्पध्वमिति ॥ ६ ॥ तस्य ह विश्वामि
त्रः स्यैकशतं पुत्रा आसुः पंचाशदेव ज्यायांसो मधुछंदसः पंचा
शत्कनीयांसः तद्ये ज्यायांसो न ते कुशलं मेनिरे तानन्नुव्याजहा
रांतान्वः प्रजा भक्षीष्टेति त एते ंध्राः पुंड्राः शबराः पुलिंदा मूति
बा इत्युदंत्या बहवो भवंति वैश्वामित्रा दस्यूनां भूयिष्ठाः स हो
वाच मधुछंदाः पंचाशता सार्द्धं यन्नः पिता संजानीते तस्मिं
स्तिष्ठामहे वयं ॥ पुरस्त्वा सर्वे कुर्महे त्वामन्वंचो वयं स्मसीत्य
थ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव ते वै पुत्राः पशुमंतो वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥

रष्ट

रवंतो भविष्यथ ॥ ये मानंमे नुगृह्णंतोवीरवंतमकर्त्तमा ॥ पुत्रावीर
वंतोदेवरात्तेन गाथिना ॥ सर्वेराध्यास्थ पुत्रा एषवः स विवाचनं ॥
एषवः कुशिका वीरो देवरात तमन्विता ॥ युष्मांश्च दायं मेउपेता
विद्यां यामुच विद्मसि ॥ ते सम्यंचो वैश्वामित्राः सर्वे साकं स
रातयः ॥ देवराताय तस्थिरे धृत्यैः श्रैष्ठ्याय गाथिनाः ॥ अधी
यत देवरातोरिक्थयोरुभयोर्ऋषिः ॥ जह्नूनां चाधिपत्ये दै
वे वेदे च गाथिनां ॥ तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानं
तद्धोता राज्ञेभिषिक्ताया चष्टे हिरण्यकशिपावासीन आचष्टे
हिरण्यकशिपासीनः प्रतिगृणाति यशो वै हिरण्यं यशसैवै
नंतत्समर्द्धयत्योमित्यृचः प्रतिगर एवं तथेति गाथाया ओमि

॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति वै देवं तथेति मानुषं दैवेनचैवैनं तन्मानुषेण च पापादेनसः
प्रमुंचति तस्माद्धोराजा विजिती स्यादप्ययजमान आख्याय
येतैवैतद्धोनः शूपमाख्यानं न हास्मिंनल्पंचनेनः परिशिष्यते
सहस्रमाख्यात्रे दद्यात् तं प्रतिगरित्रे ए तेचैवासनेन्वेत
च्याश्वतरीरथोहोतुः पुत्रकामाहाप्याख्यापयेरंल्लभंतेहपु
त्रांल्लभंतेहपुत्रान् ॥१८॥६॥३॥ प्रजापतिर्यज्ञमसृजत य
ज्ञंसृष्टमनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजा
असृज्यंत हुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्षत्रमन्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२२॥ हुतादूर्द्ध्वं तावै प्रजा हुतादो यद्ब्राह्मणा ऽ अथैता ऽ अहुतादो यद्रा
जन्यो वैश्यः शूद्रः स्ताभ्यो यज्ञ उदक्रामत्तं ब्रह्मक्षत्रे अन्वैतां या
न्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद्यानि क्षत्रस्य तैः क्षत्रमेता त्र २
नि वै ब्रह्मण आयुधानि यद्यज्ञायुधान्यथैतानि क्षत्रस्यायुधा
नि यदश्वरथः कवच इषुधन्व तं क्षत्रमनन्वाप्य न्यवर्त्ततायुधे
भ्यो ह स्मास्य विजमानः पराङ् एवैत्यथैनं ब्रह्मान्वैत्तमाप्नोत्तमाप्त्वा
परस्तान्निरुध्यातिष्ठत्स आप्तः परस्तान्निरुद्धस्तिष्ठं ज्ञात्वा स्वा
न्यायुधानि ब्रह्मोपावर्त्तत तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव
ब्राह्मणेषु प्रतिष्ठितो ऽथैनं क्षत्रमन्वागच्छत्तदब्रवीदुप मास्मि ॥२२॥

पूर्त्तस्या परिज्यानिः क्षत्रियस्य यजमानस्य स पुरस्ताद्दीक्षायाः आ
हुतिं जुहुयाच्चतुर्गृहीतमाज्यमाहवनीय इष्टापूर्त्तस्या परिज्यान्यै
पुनर्न इन्द्रो मघवा ददातु ॥ ब्रह्म पुनरिष्टं पूर्त्तं दात् स्वाहेत्यथानू
बंध्यायै समिष्टयजुषामुपरिष्टात्पुनर्नो अग्निर्जातवेदा ददातु ॥
क्षत्रं पुनरिष्टं पूर्त्तं दात् स्वाहेति सैषेष्टापूर्त्तस्या परिज्यानिः क्ष
त्रियस्य यजमानस्य यदेते आहुती तस्मादेते होतव्ये ॥ २१ ॥ त
दु ह स्माह सौजात आराढ्हिरजीतपुनर्वण्यं वा एतद्यदेते आ
हुती इति यथा ह कामयेत तथैते कुर्याद्यद् इतोनुशासने कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ योग्दितीमेत्वेवजुहुयाद्ब्रह्मप्रपद्ये ब्रह्ममाक्षत्राद्गोपायतुब्रह्म
णेस्वाहेतितस्माद्दितीं॥३॥ब्रह्मवाएषप्रपद्यतेयोध्वरंप्रपद्यतेब्र
ह्मवैयज्ञोयज्ञादुहवाएषपुनर्जायतेयोदीक्षतेतंब्रह्मप्रप
न्नंक्षत्रंनपरिजिनातिब्रह्ममाक्षत्राद्गोपायत्वित्याहयथैनंब्र
ह्मक्षत्राद्गोपायेद्ब्रह्मणेस्वाहेतितदेनंप्रीणातितदेनंप्री
तंक्षत्राद्गोपायत्यथानुबंध्यायैसमिष्टयजुषामुपरिष्टात्क्ष
त्रंप्रपद्येक्षत्रंमाब्रह्मणोगोपायतुक्षत्रायस्वाहेतितस्माद
तीं॥३॥क्षत्रंवाएषप्रपद्यतेयोराष्ट्रंप्रपद्यतेक्षत्रंहिराष्ट्रंतंक्ष
त्रंप्रपन्नंब्रह्मनपरिजिनातिक्षत्रंमाब्रह्मणोगोपायत्वि ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.20 12:34
,TRANSFERRED=2020/07/24 at 12:39:53
,PAGES=47
,TYPE=STD
,NAME=S0003368
,Book Name=M-2644-ROTEREY BRAHAMAN SAPTAM PANCHIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection